**अहीमती** स्त्री अहिरस्त्यस्याम् मतुप् शरादि० दीर्घः । नदीभेदे

**अहीर** पु० आभीरस्य पृषो० साधुत्वम् । आभीरे । [उक्तः ।

**अहीरणादि** पु० अरीहणादिगणे पाठान्तरम् स च गणः तच्छब्दे

**अहीरणि** पु० अहीन् ईरयति दूरीकरोति ईर–अनि ।

द्विमुखसर्पे तद्दर्शनाद्धीतरे सर्पाः पलायन्ते ।

**अहीशुव** पु० अहिरिव शूयते शु–क बा० दीर्घः । शत्रौ "पिप्रु-

दासमहीशुवम्" ऋ० ८,३२,२ । "अहीशुवं शत्रुम्"भा० ।

**अहु** त्रि० अह–व्याप्तौ उन् । व्यापके स्त्रियां ङीप् "पर

उर्वीर्वा अन्या उपसदः परोऽह्वीरन्याः" शत०ब्रा० ।

अंहते आधारे उन् अंङ्क भगे न० । "यदस्य अंहुभेद्या

कधु" य० २३,२८, "अंहु भगं भेद्यं विदार्यं यस्याः" दीपः ।

**अहुत** पु० नास्ति हुतं हवनं यत्र । धर्मसाधनत्वेऽपि अहोमे

१वेदपाठे । "अहुतं च हुतञ्चैव तथा प्रहुतमेव च । ब्राह्म्यं

हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते" जपोऽहुतो हुतो-

होमः प्रहुतो भौतिको बलिः । ब्राह्म्यं हुतं द्विजाग्र्यार्चा

प्राशितं पितृतर्पणम्" मनुः यस्य हवनं न कृतं तादृशे

२हविरादौ त्रि० । "अथ यत् पुराणा नाश्नन्ति यथा

अहुतस्य हविषो नाश्नीयात् एवं तत्तस्माद्दीक्षितस्य नाश्नी-

यात्" शत० ब्रा० ।

**अहृणान** त्रि० हृणी–रोषणे कण्ड्वा० ताच्छील्ये चानश्

वेदे नि०न०त० । अक्रोधने । "किं मे हव्यमहृणानो-

जुषेत" ऋ० ७,८६,२ । लोके क्वचित् वेदे च अहृणीय-

मानः । "राजाना क्षत्रमहृणीयमाना:" ऋ० ५,६२,६ ।

**अहे** अव्य–अह+ए । १क्षेपे, वियोगे च । "अहे राम !

घनश्याम ! चुम्बामि मुखपङ्कजम् । यदि जीवामि शोकेन

पुनः पश्यामि ते मुखम्" ।

**अहेड** त्रि० हेड–अनादरे अच् न०त० । अवज्ञाशून्ये

**अहेडमान** त्रि० हेड–शानच् न०त० । आद्रियमाणे अव-

ज्ञाशून्ये "अहेडमानो वरुणः" ऋ० १,२४,११ ।

**अहेतु** पु०न०त० । १हेतुभिन्ने न०ब० । २हेतुशून्ये त्रि० वा

कप् अहेतुकोऽप्युक्तार्थे । हेतुः कारणमुद्देश्यञ्च । कारणञ्च

कार्याव्यवहितक्षणे कार्याधिकरणे स्थितिशाली यथा घटा-

दिकं प्रति मृत्तिकादि कटकादिकं सुवर्णादि । तयोस्तद-

धिकरणे तत्पूर्व्वं स्थितत्वात् तथात्वम् । कारणताग्राहकौ च

अन्वयव्यतिरेकौ । मतभेदे तद्ग्राहकाणि कारणशब्दे वक्ष्यन्ते

**अहेरु** पु० न हिनोति हि–रु न०त० । शतमूल्याम् ।

**अहैतुक** त्रि० हेतुत आगतम् ठञ् न०त० । १हेतुतोऽ-

प्राप्ते २उद्दिश्यान्तरासक्ततयाऽकृते । ३उपपत्तिशून्ये

च । "यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।

अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्" गीता ।

**अहो** अव्य० न+हा–डो । १शोके, २धिगर्थे, ३विषादे,

४दयायां, ५सम्बोधने, ६विस्मये, ७प्रशंसायाम्, ८वितर्के,

९असूयायाञ्च "अहो महत्त्वं महतामपूर्व्वम्" नीतिः

"कुसुमधनुषोमन्दिरमहो" श्यामास्तवः । "अहो अहो-

भिर्महिमाहिमागमे" नैष० ।

**अहोरात्र** पु० अहश्च रात्रिश्च टच् समा० । सूर्य्योदयद्वय-

मध्यवर्त्तिकाले षष्टिदण्डात्मके मानुषे दिने पित्राद्यहोरा-

त्रमानन्तु–अहश्शब्दे ५७६पृष्ठे उक्तम् । त्रिंशत्कला मुहूर्त्तः

स्यादहोरात्रस्तु तावतः । अहोरात्रे विभजते सूर्य्यो मानु-

षदैविके" मनुः । "रात्राह्नाहाः पुंसि" पा० उक्तेः पुंस्त्वे-

ऽपि आर्षत्वात् क्लीवम् "रात्रिञ्च तावतीमेव तेऽहोरात्र

विदोविदुः" मनुः । [दिवसे गेये रथन्तरनामकसामभेदे ।

**अहोरथन्तर** न० अह्नि गेयं रथन्तरम् सामभेदः न रो रः ।

**अहोरूप** न० अह्नो रूपम् न रो रः । दिवसरूपे ।

**अहोवत** अव्य० अहो च वत च द्व० । १खेदे, २सम्बोधने ३अनु-

कम्पायाञ्च । "अहोवत महत् कष्टम्" गणरत्न० "अहोवत

महत् पापम्" गीता "अहोवतासि स्पृहणीयवीर्य्यः" कुमा०

**अह्नवाय्य** त्रि० ह्नु–बा० आय्य न०त० । निह्नवाकर्त्तरि ।

"सत्यं तत्तु र्वशे यदो विदानो अह्नवाय्यम्" ऋ० ८,४५,२७

**अह्नाय** अव्य० ह्नु–घञ् वृद्धिः पृषो० वस्य यत्वं न०त० ।

शैघ्र्ये । "अह्नाय सा नियमजं क्लममुत्ससर्ज" कुमा०

"अह्नाय तावदरुणेन तमो निरस्तम्" रघुः स्वच्छन्दो-

च्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा–मूर्च्छन्मोहमहर्षि

हर्षविहितस्नानाह्निकाऽह्नाय वः" का० प्रा० ।

**अह्रयाशु** त्रि० अहिमाहन्तारं शत्रुम्प्रति ऋष–उ । शत्रुं

प्रति आभिमुख्येन गन्तरि "अह्रयाशूणां चिन्नयां अवि-

ष्याम्" ऋ० २।३८।३ ।

**अह्रय** त्रि० न जिह्रेति ह्री–अच् न०त० । निर्लज्जे

"हणीमहे अह्रयं वाजमृग्मियम्" ऋ० ३,२,४, ।

**अह्रयाण** त्रि० ह्री–बा० आनच् न०त० । निर्लज्जे "अप

एति युवतिरह्रयाणा" ऋ० ७,८०,२ । [ऋ० ९,५४,१ ।

**अह्रि** पु० ह्र–क्रि न०त० । कवौ । "शुक्रं दुदुह्रे अह्रयः"

**अह्रुत** त्रि० ह्रु–क्त न०त० पृ० । अकुटिले "समेनमह्रुत

इमा गिरः" ऋ० ८,२४,६ ।

**अह्रीक** पु० नास्ति ह्रीर्यस्य । १ क्षपणके तस्य दिगम्बरत्वेन

लज्जाहीनत्वात्तथात्वम् २निर्लज्जे त्रि० ।